Kumara Suktam

ऋषिः वामदेवः, देवता १-६ अग्निः, ७-८ सोमकः साहदेव्यः, १० अशिव्नौ,
छन्दः १,४ गायत्री, २,५,६ विराड्गायत्री, ३, ७-१० निचृद्गायत्री
स्वरः षड्जः

अ॒ग्निर्होता॑ नो अध्व॒रे वा॒जी सन्परि॑ णीयते ।
दे॒वो दे॒वेषु॑ य॒ज्ञियः॑ ॥ ४.०१५.०१
परि॑ त्रिवि॒ष्ट्य॑ध्व॒रं यात्य॒ग्नी र॒थीरि॑व ।
आ दे॒वेषु॒ प्रयो॒ दध॑त् ॥ ४.०१५.०२
परि॒ वाज॑पतिः क॒विर॒ग्निर्ह॒व्यान्य॑क्रमीत् ।
दध॒द्रत्ना॑नि दा॒शुषे॑ ॥ ४.०१५.०३
अ॒यं यः सृञ्ज॑ये पु॒रो दै॑ववा॒ते स॑मि॒ध्यते॑ ।
द्यु॒माँ अ॑मित्र॒दम्भ॑नः ॥ ४.०१५.०४
अस्य॑ घा वी॒र ईव॑तो॒ऽग्नेरी॑शीत॒ मर्त्यः॑ ।
ति॒ग्मज॑म्भस्य मी॒ळ्हुषः॑ ॥ ४.०१५.०५
तमर्व॑न्तं॒ न सा॑न॒सिम॑रु॒षं न दि॒वः शिशु॑म् ।
म॒र्मृ॒ज्यन्ते॑ दि॒वेदि॑वे ॥ ४.०१५.०६
बोध॒द्यन्मा॒ हरि॑भ्यां कुमा॒रः सा॑हदे॒व्यः ।
अच्छा॒ न हू॒त उद॑रम् ॥ ४.०१५.०७
उ॒त त्या य॑ज॒ता हरी॑ कुमा॒रात्सा॑हदे॒व्यात् ।
प्रय॑ता स॒द्य आ द॑दे ॥ ४.०१५.०८
ए॒ष वां॑ देवावश्विना कुमा॒रः सा॑हदे॒व्यः ।
दी॒र्घायु॑रस्तु॒ सोम॑कः ॥ ४.०१५.०९
तं यु॒वं दे॑वावश्विना कुमा॒रं सा॑हदे॒व्यम् ।
दी॒र्घायु॑षं कृणोतन ॥ ४.०१५.१०
ऋषिः-१, ३-८, १०-१२ कुमार आत्रेयो, वृशो वा जार उभी वा;
२, ९ वृशो जारः ॥

देवता- अग्निः ॥

छन्दः-१, ३, ७, ८ त्रिष्टुपः २ स्वराट्पतिः ४, ५, ९, १० निवृत्त्रिष्टुप;
६ भुरिक्पक्तिः ११ विरात्रिष्टुप्; १२ निवृदतिजगती॥

स्वरः- १, ३-५, ७-११ धैवतः; २, ६ पञ्चमः, १२ निषादः ॥

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥ ५.००२.०१
कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥ ५.००२.०२
हिरण्यदन्तं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानम् ।
ददानो अस्मा अमृतं विपृक्वत्किं मामनिन्द्राः कृणवन्ननुक्थाः ॥ ५.००२.०३
क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथं न पुरु शोभमानम् ।
न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति ॥ ५.००२.०४
के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदास ।
य ईं जगृभुरव ते सृजन्त्वाजाति पश्व उप नश्चिकित्वान् ॥ ५.००२.०५
वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु ।
ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥ ५.००२.०६
शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः ।
एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥ ५.००२.०७
हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥ ५.००२.०८
वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ ५.००२.०९
उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ ५.००२.१०

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥ ५.००२.११
तुविग्रीवो वृषभो वावृधानोऽशत्र्व१र्यः समजाति वेदः ।
इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत् ॥
५.००२.१२